# 5 शीलायाः प्रवासः




**सविता :** (भ्रमणभाषं धृत्वा) हरि ॐ।

**शिक्षिका :** हरिः ॐ । कः वदति ?

**सविता :** अहं शीलायाः माता वदामि । प्रवासे मम पुत्री अस्ति ।



**शिक्षिका :** आम् अस्ति । किञ्चित् कार्यम् अस्ति वा ?

**सविता :** आम्, अहं तया सह वार्तालापं कर्तुम् इच्छामि । (शिक्षिका शीलां प्रति भ्रमणभाषं प्रेषयति ।)

**शीला :** अम्ब, कथम् अस्ति सर्वं कुशलं वा ?



**सविता :** आम्, अहं कुशलिनी। भवत्याः प्रवासः कथं प्रचलति ?

**शीला :** प्रवासः तु सम्यक् प्रचलति। अधुना अहम् अजन्तागुहायाम् अस्मि।

**सविता :** शोभनम् । तत्र किं किम् अस्ति ?

**शीला :** अत्र अनेकानि चित्राणि शिल्पानि च सन्ति।

**सविता** : तत्र कानि चित्राणि सन्ति ?

**शीला** : भगवत:बुद्धस्य शिल्पं सुन्दरम् अस्ति। अन्यत् च चतुर्मुखस्य हरिणस्य चित्रम् अपि मनोहरम अस्ति । अत्र बहूनि सुन्दराणि चित्राणि अपि सन्ति ।

**सविता** : पद्मपाणे: चित्रं तत्र अस्ति वा ?

**शीला** : आम्, अस्ति । अस्माभि: सह मार्गदर्शक: अपि अस्ति ।

**सविता** : स: किं कथयति ?

**शीला** : स: बौद्धगुहाया: विषये अस्माभि: सह वार्तालापं करोति । अपि च, गुहाया: इतिहासम् अपिमा कथयति ।

**सविता** : तेषां स्थानानां कानिचित् छायाचित्राणि आनयतु ।

**शीला** : अवश्यम् आनेष्यामि ।

**सविता** : अजन्तात: प्रवास: कुत्र गमिष्यति ?

**शीला** : अजन्टात: वयं घुष्णेश्वरं, घुष्णेश्वर: शीरडीं, शीरडीत: त्र्यम्बकेश्वरं, त्र्यम्बकेश्वरत: नासिकं गमिष्याम: ।

**सविता** : शोभनम्, प्रवास: शिक्षणस्य भाग: एव अस्ति । तर्हि सम्यक्रीत्या प्रवासं करोतु । भवती यत् यत् पश्यति तत् सर्वं टिप्पणीपुस्तके लिखतु ।

**शीला** : आम्, अवश्यं लेखिष्यामि ।

**सविता** : अपि च, प्रवासस्थानस्य विशेषतां तथा तस्य स्थानस्य इतिहासविषये अपि लिखतु ।

**शीला** : अवश्यम् । भवतु, नमोनम:।

**सविता** : नमोनम:।

## Glossary

**भ्रमणभाषः** mobile **शीलायाः** of Shila **तस्यै** her **अम्ब** mother **अधुना** now **भवत्याः** your **कथम् अस्ति** How are you ? **गुहायाम्** in the care **चतुर्मुख** four faced **पद्मपाणेः** of Padmapani **मार्गदर्शकः** guide **सम्यक् रीत्या** well **बौद्धगुहायाः** of Buddha cave **अस्माभिः सह** with us **टिप्पणीपुस्तकम्** notebook **आनयतु** bring

## Exericise

1. **Pronounce the following words properly :**

भ्रमणभाषः, किञ्चित्, प्रेषयति, सम्यक्, प्रचलति, अजन्तागुहायाम्, चतुर्मुखस्य, पद्मपाणेः, बौद्धगुहायाः, त्र्यम्बकेश्वरम्, घुष्णेश्वरतः, टिप्पणीपुस्तकम् ।

2. **Answer the following question in Sanskrit :**

(1) का दूरभाषं करोति ?

(2) शीला कस्याः पुत्री अस्ति ?

(3) शीला कुत्र गच्छति ?

(4) शीला किं किं पश्यति ?

3. **Turn the following statements into questions. Follow the illustration :**

**Illustration :** शीला अजन्तागुहायाम् अस्ति ।

शीला कुत्र अस्ति ?

(1) महेशः उद्याने अस्ति ।

(2) फरिदा वाटिकायाम् अस्ति ।

(3) सुनन्दा शालायाम् अस्ति ।

**Illustration :** शीला <u>गृहतः</u> मन्दिरं गच्छति ।

शीला <u>कुतः</u> मन्दिरं गच्छति ?

शीला <u>गृहतः</u> <u>कुत्र</u> गच्छति ?

(1) नरेन्द्रः कार्यालयतः गृहं गच्छति ।

(2) विनयः क्रीडाङ्गणतः वाटिकां गच्छति ।

(3) अलका पालनपुरतः गान्धीनगरं गच्छति ।

### 4. Frame the statement. Follow the illustration :

**Illustration :** नटराजः चित्रम् । नटराजस्य चित्रम् अस्ति ।

(1) वेदान्तः पुस्तकम् । ____________________

(2) पार्थः कन्दुकः । ____________________

(3) कल्पेशः लेखनी । ____________________

(4) कर्णः कुण्डलम् । ____________________

(5) निसर्गः गृहम् । ____________________

**Illustration :** शीला पुस्तकम् ।

शीलायाः पुस्तकम् अस्ति ।

(1) रेखा द्विचक्रिका । ____________________

(2) विद्या प्रभावः । ____________________

(3) कृपा आसन्दः । ____________________

(4) मीना पाठशाला । ____________________

(5) अनीक्षा शाटिका । ____________________

**5. Traslate the following sentences into Sanskrit :**

(1) Arti is going to Rajkot from Junagadh.

____________________

(2) Harsha is going to Amreli from Junagadh.

____________________

(3) Mihir is going to Surat from Junagadh.

____________________

(4) Kumar is going to Ahmedabad from Bhuj.

____________________

(5) Usha is going to Rajpipla from Baroda.

____________________

**6. From which places do the buses come to your village ? Describe it in Sanskrit.**

For example,

लोकयानं हिंमतनगरतः इडरं गच्छति । इडरतः वटपल्लीं गच्छति । वटपल्लीतः भावनगरं गच्छति।

ज्ञातव्यम्

## संस्कृत सामयिकानाम् सूचि

| नाम | प्रकार | स्थान |
|---|---|---|
| • गाण्डीवम् | साप्ताहिकम् | वाराणसी |
| • उद्यानपत्रिका | मासिकम् | आन्ध्रप्रदेशः |
| • अभिनवसंस्कृतम् | वार्षिकम् | कानपुरम् |
| • अनादिवाक् | त्रैमासिकम् | नई दिल्ली |
| • अर्वाचीनसंस्कृतम् | त्रैमासिकम् | नई दिल्ली |
| • गीर्वाणसुधा | मासिकम् | मुम्बई |
| • दिव्यज्योतिः | मासिकम् | शिमला |
| • पारिजातम् | मासिकम् | कानपुरम् |
| • संस्कृतसन्देशः | दैनिकम् | वडोदरा |
| • साम्प्रतम् | मासिकम् | अमदावाद |
| • सम्भाषणसन्देशः | मासिकम् | बङ्गलुरुः |
| • रसना | मासिकम् | केराला |